संस्कृतवार्ताः
16.04.2024
सायम् - 06:20

मुख्यवार्ता:

· विविधानां प्रमुखराजनीतिक-दलानां मुख्य-प्रचारकाः लोकसभा-निर्वाचनानां प्रथम-द्वितीय-चरणयोः कृते प्रचाराभियानं कुर्वन्ति तीव्रतरम् ।

· प्रधानमन्त्रिणा भाजपा-वरिष्ठ-नेत्रा च श्रीमोदिना बिहारे जनसभाद्वयी सम्बोधिता । कान्ग्रेस्-नेत्री प्रियङ्का-गान्धी-वाड्रा च असमस्य जोरहट्टे कृतवती जनसभाम् ।

· देशस्य समग्र-विकासाय आर्थिक-विकासः महत्वपूर्णः अस्ति इति ब्रूते राष्ट्रपतिः द्रौपदी-मुर्मु-वर्या ।

· रामबन-जनपदे कटरातः संगल-दान-क्षेत्रस्य संयोजनपरायाः महत्वकांक्षि-रेल-परियोजनायाः कार्यं जवीयस्या गत्या प्रवर्ततेतराम् ।

· परमाणु-ऊर्जा-निरीक्षण-सम्बद्धेन संयुक्तराष्ट्रस्य अन्ताराष्ट्रिय-परमाणूर्जा-अभिकरणेन ईरान-देशस्य परमाणु-केन्द्रेषु इजराईल-देशस्य आक्रमणस्य सम्भावनां ध्यात्वा चिन्ता प्रकटिता अस्ति ।

प्रधानमन्त्री-बिहारयात्रा (HL-2)

प्रधानमन्त्री वरिष्ठ: भाजपा नेता च श्रीनरेन्द्रमोदी उदैरयत् यत् कांग्रेसदलं तस्य सहयोगि-दलानि च निज राजनीतिक लाभाय संविधानस्य उपयोगम् अस्त्रत्वेन कुर्वन्ति। अद्य प्रातः बिहारस्य गयाया: गान्धी मैदान प्राङ्गणे एकस्यां सार्वजनिक्यां जनसभायां जनान् संबोधयन् श्रीमोदी भणितवान् यत् विपक्ष-दलै: जन-सामान्येषु दिग्भ्रान्तिं समुत्पादयितुं मृषाकथा प्रसार्यते यत् भाजपादलं संविधानं परिवर्तयिष्यति। अमुना जना: आश्वासिता: यत् संविधानं न केनापि परिवर्तितुं शक्यते। श्रीमोदिना प्रोक्तं यत्, भाजपा दलेन देशे राष्ट्रिय-संविधान-दिवसस्य संस्थागत-रूपत्वेन प्रतिष्ठापनां विधाय जनेषु संविधानस्य वास्तविक्या: भावनाया: राष्ट्रचेतनायाश्च जागरणस्य प्रयास: कृत: अस्ति। प्रधानमन्त्री मोदी प्रोदैरयत् यत्, विपक्षस्य राष्ट्राहितकरान् मनोरथान् देशस्य जनता निर्वाचनेषु मतदानद्वारा ध्वस्तीकरिष्यति। अत्रावसरे श्रीमोदी कांग्रेसदले तत्सहयोगिदलेषु च सनातन-धर्मस्य दुरुपयोगस्य अपमानस्य चापि आरोपान् आरोपितवान्। बिहारस्य दुर्दशाया: कृतेऽपि राजद दलस्य पूर्ववर्तिन: शासनस्य कट्वालोचनां कुर्वन् वरिष्ठ: भाजपा-नेता प्रावोचत्

यत् , राजदस्य शासनं आरण्यशासनस्य भ्रष्टाचारस्य मुखमस्ति। तदनु पूर्णियायां एकाम् अन्यां जनसभां सम्बोधयन् श्रीमोदी विपक्ष-दलेषु मत-लोलुपतायाः राजनीतीकरणस्य अवैध-प्रवेशस्य च अनुमतिं दत्वा राष्ट्रसुरक्षायाः अवहेलनायाः आरोपान् अपि आरोपितवान्। इंडीसंयुतेः नेतारः भ्रष्टाचारिणां रक्षणे निरताः, वयं तेषाम् अपसारणे, आगामि पञ्चवर्षेषु एतेषु अतोऽपि काठोर्यं भविष्यति। प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना बिहारे अद्य घण्टात्रयं यावत् जनसभा सम्बोधिता। प्रधानमन्त्रिणा संविधान-भ्रष्टाचार-राममन्दिर-आतंकवाद-विषयेषु इंडी-संयुतौ वाग्बाणाः प्रहृताः। श्रीमोदिना पूर्णियायां प्रोदितं यत् घमंडिया-संयुतेः जनाः सनातनम् अपाकर्तुम् संलग्नाः सन्ति। वयं भ्रष्टाचारस्य उन्मूलने कार्यरताः स्मः, ते च भ्रष्टाचारि-जनान् संरक्षितुं प्रयतमानाः वर्तन्ते। भ्रष्टाचारस्य केन्द्राणि रक्षितुम् अपि ते निरताः सन्ति। ये जनाः सम्प्रति संविधानस्य परिवर्तनस्य भ्रान्तिम् उद्घोषयन्ति, तैः भूरि दशकानि पर्यन्तं शासनं कृतम्, किन्तु ते बाबा-साहेब-वर्यस्य संविधानं कश्मीरे क्रियान्वितं नैव कर्तुं प्राभवन् । एषः मोदी अस्ति, अद्य जम्मू-कश्मीरे अपि संविधानं पूर्णसम्मानपूर्वकं प्रवर्तितम् अस्ति। त एव कथयन्ति स्म यत् संविधानस्य सप्तत्युत्तर-त्रि-शत-तमी-धारा अपाक्रियते चेत् कश्मीरे अग्निकाण्डानि भविष्यन्ति। किन्तु अद्य सप्तत्युत्तर-त्रि-शत-तमी-धारा समग्रतो दृशा समाप्ता वर्तते, भारतस्य विखण्डनकर्तारः पेपीड्यमानाः जाज्वल्यमानाश्च जाजायन्ते। एते तु श्रीराममन्दिरस्य कृतेऽपि एवमेव कथयन्ति स्म। किन्तु सम्प्रति श्रीराममन्दिरं विश्वस्मिन्नपि विश्वे भारतस्य गौरवम् अस्ति।

<u>राष्ट्रपतिः द्रौपदी-मुर्मु (HL-3)</u>

राष्ट्रपतिः द्रौपदी-मुर्मु-वर्या उक्तवती यत् सांख्यिकी-विश्लेषणानां, साक्ष्याधारित-विकास-कार्यक्रमाणां च प्रवर्तनेन जनानाम् आर्थिक-उत्थानार्थं तीव्रता-पादन-प्रसङ्गे सर्वकारः अपि सौविध्यम् अनुभवति । अमुना प्रोक्तं यत् भारतीय-आर्थिक-सेवा-विभागस्य युवा-अधिकारिणाम् एतत् कर्तव्यम् अस्ति यत्ते नूतन-विचाराणां, प्रविधीनां , प्रौद्योगिकीनां च प्रशिक्षणेन नैजीं कार्यक्षमतां सम्वर्धयेयुः । राष्ट्रपति-भवने अद्य भारतीय-आर्थिक-सेवा-विभागस्य परिवीक्षाधीनानाम् अधिकारिणाम् एकं समूहं सम्बोधयन्ती मुर्मुवर्या प्रत्यपादयत् यत् आर्थिक-विकासः देशस्य समग्र-विकासस्य महत्वपूर्णः भागः अस्ति ।

## जम्मू-कश्मीर: (HL-4)

रामबन-जनपदे कटरातः संगल-दान-क्षेत्रस्य संयोजनपरायाः महत्वकांक्षि-रेल-परियोजनायाः कार्यं अस्य वर्षस्य जूनमासं यावत् सम्पूर्तिं यास्यति इति आशास्यते ।अस्माकं वार्ताहरः सूचयति यत् सम्प्रति कन्याकुमारी-तः कटरा-पर्यन्तं रेलयानानि चलन्ति । तथा कश्मीरोपत्यकायाम् अपि बारामुला-तः संगल-दान-पर्यन्तं रेलयानानि चलन्ति । सम्प्रति कटरा-तः संगलदान-पर्यन्तं रेल-संपर्कस्य समारम्भेण अत्रत्यः गमना-गमन-अन्तरालः अपि अवसितो भविष्यति ।येन कश्मीर-तः कन्याकुमारीं यावत् निर्बाध-रीत्या यात्रा सम्भविष्यति ।

## अन्ताराष्ट्रिय-परमाणूर्जा-अभिकरणस्य चिन्ता (HL-5)

परमाणु-ऊर्जा-निरीक्षण-सम्बद्धेन संयुक्तराष्ट्रस्य अन्ताराष्ट्रिय-परमाणूर्जा-अभिकरणेन ईरान-देशस्य परमाणु-केन्द्रेषु इजराईल-देशस्य आक्रमणस्य सम्भावनां ध्यात्वा चिन्ता प्रकटिता अस्ति । अन्ताराष्ट्रिय-परमाणूर्जा-अभिकरणस्य महानिदेशकेन राफेल-ग्रोसी इत्यनेन अस्मिन् प्रसङ्गे अधिकतम-संयम-सन्धारणस्य अध्यर्थना कृता अस्ति । अमुना प्रोक्तं यत् ईरान-देशेन इस्राइल-पक्षतः बृहन्मात्रायां प्रक्षेप्यास्त्र-आक्रमणस्य , ड्रोन-आक्रमणस्य च आशङ्काः निभाल्य सुरक्षा-दृशा तत्रत्यानि परमाणूर्जा-केन्द्राणि अस्थायि-रीत्या पिहितानि सन्ति । अवधेयम् अस्ति यत् इस्राइल-देशस्य प्रधानमन्त्रिणा बेंजामिन-नेतन्याहू-वर्येण ईरानस्य आक्रमणस्य प्रतिक्रिया-कार्यान्वयनस्य निर्णयार्थं चतुर्विंशति-होराभ्यन्तरे एव द्वि-कृत्वः निज-युद्ध-मन्त्रणा-परिषदः गम्भीरोपवेशनम् आकारितम् अस्ति यद्यपि तस्य सर्वकारेण साम्प्रतं यावत् अस्मिन् प्रसङ्गे न कस्यापि निर्णयस्य घोषणा कृता अस्ति ।

## असम-प्रधानमन्त्रि-अभियानम्

प्रधानमन्त्री, वरिष्ठ: भाजपा-नेता च श्रीनरेन्द्र मोदी असम-राज्ये एन.डी.ए. संयुतेः प्रत्याशिनां कृते प्रचारार्थम् अद्य सायं गौहाटीं प्राप्स्यति। दलस्य स्रोतांसि प्रत्यपादयन् यत् गौहाट्याः बोरझार-क्षेत्रे संप्राप्ते सति स्थानीय-जना:, दलकार्यकर्तारश्च तस्य स्वागताभिनन्दनं करिष्यन्ति। श्रीमोदी श्व: नलबाड़ी-मध्ये एकां जनसभां सम्बोधयिष्यति। अत्रान्तरे, कांग्रेस-नेत्री प्रियंका गांधी वाड्रा अपि असमस्य जोरहाट-जनपदे "रोड शो" इति पथ-प्रदर्शनीं कृतवती। मुख्यमन्त्री भाजपा नेता च हिमंत बिस्वा सरमा अपि निर्वाचनानि निध्याय माजुली क्षेत्रे समुपवेशनम् आचरितवान्। अपरत्र च, तृणमूल-कांग्रेस-दल-प्रमुखा, पश्चिम-बंगालस्य मुख्यमन्त्री च ममता बनर्जी श्व: सिलचरे निर्वाचन-प्रचारं करिष्यति। ध्येयमस्ति यत् असमे चतुर्दश-लोकसभासनेषु त्रिषु चरणेषु मतदानं भाव्यं वर्तते।

भाजपा-आप-बसपा सूची:

भाजपा-दलेन अद्य आगामि-लोकसभा, विधानसभा चेति निर्वाचनानां प्रत्याशिनां सूची प्रख्यापिता।ओडिशाराज्ये निर्वाचनानि तेलंगानायाम् उत्तरप्रदेशे च विधानसभाया: उपनिर्वाचनानि भवन्ति। भाजपा-दलेन ओडिशा-विधानसभाया: निर्वाचनार्थम् एकविंशतिः प्रत्याशिनां नामानि महाराष्ट्रे, पंजाबे, उत्तरप्रदेशे पश्चिमबंगाले च लोकसभासनानां कृते सप्त प्रत्याशिनां सूच्या: घोषणा कृता। सहैव तेलंगानायां उत्तरप्रदेशे च उपनिर्वाचनानां च कृते पञ्च प्रत्याशिनां सूची अपि प्राख्यापिता। अत्रान्तरे, आम आदमी पार्टीति दलेन पंजाब राज्ये आगामि लोकसभा निर्वाचनानां च कृते चतुर्णां प्रत्याशिनां सूची प्राख्यापिता अस्ति। जगदीप-सिंह: च "काका बराड़ फिरोजपुर त:" अमनशेर सिंह: गुरदासपुर-संसदीय-क्षेत्रत:, निर्वाचनं योत्स्यत:। दलेन जालंधर त: पवन-कुमार-टीनू, लुधियाना-संसदीय-क्षेत्रताश्च अशोक पाराशर: पप्पी निर्वाचनाहवे अवतारितौ स्त:। एकस्मिन् अन्यघटनाक्रमे , बहुजन-समाज-पार्टीति दलेन आगामि-लोकसभा-निर्वाचनार्थम् एकादश-प्रत्याशिनः अवतारिताः सन्ति । वाराणसीतः प्रधानमन्त्रिणं भाजपाप्रत्याशिनं च श्रीनरेन्द्र-मोदिनं विरुध्य बसपा-दलस्य प्रत्याशी अतहर-जमाल-लारी निर्वाचन-समरे अवतारितोऽस्ति । अथ च बसपा-दलेन मैनपुरी-लोकसभा-क्षेत्रस्य निजिप्रत्याशी परिवर्त्य शिव-प्रसादाय प्रत्याशित्वं प्रदत्तम् अस्ति ।

जम्मू-कश्मीरः-अमित शाहः

भाजपादलस्य वरिष्ठ-नेता केन्द्रीय-गृहमन्त्री च अमित-शाहः कांग्रेस्-दले, नेशनल-कॉन्फ्रेंस्-दले , पीडीपी-दले च आरोपान् आरोपितवान् यत् एतैः दलैः आतङ्कवादं वर्धयितुं नवयुवकानां हस्तेषु गोलिकाभृताः भुशुण्डिकाः प्रदत्ताः । अस्माकं वार्ताहरो वर्णयति यत् जम्म्वाः पलौरा-क्षेत्रे एकां सार्वजनिकीं जनसभां सम्बोधयन् श्री-शाहः कश्मीर-जनान् विशेषतश्च तत्रत्यान् युवजनान् अध्यार्थयत् यत् ते तादृशेभ्यः दलेभ्यः नैजं मतं नैव प्रदद्युः। अनुना सङ्केतितं यत्- भाजपा-दलं कश्मीरस्य त्रिषु महत्वपूर्णेषु लोकसभासनेषु निज-प्रत्याशिनः नैव अवतारयिष्यति । केन्द्रीय-मन्त्रिणा इदमपि प्रोक्तं यत्- जम्मू-कश्मीरे विधानसभा-निर्वाचनानि भारतस्य सर्वोच्च-न्यायालय-द्वारा घोषितेषु तिथिषु एव यथावस्थं भविष्यन्ति । शीर्ष-न्यायालयेन प्रोदितम् आसीत् यत्- जम्मू-कश्मीरे ऐषमः सितम्बर-मासे विधानसभा-निर्वाचनानि विधेयानि । श्री-शाहः उदैरयत् यत्- अद्य आतङ्कवादः निज-मृत्यु-शय्यायां वर्तते । प्रस्तर-क्षेपणं, पिधानाह्वानं मार्ग-विरोध-प्रदर्शनं च सम्प्रति एका कथा सम्पन्ना अस्ति । डॉ. श्यामा-प्रसाद-मुखर्जिनः बलिदानं संस्मरन् श्री-शाहः प्रावोचत् यत् अद्य डॉ. मुखर्जिनः एकं राष्ट्रं, एक-विधानं, एक-प्रधानः, एक-प्रतीकं इति स्वप्नः साकारीभूतोऽस्ति । श्रीशाहः न्यगदत् यत् – प्रधानमन्त्रिणा नरेन्द्रमोदिना तेषां युवजनानां हस्तेषु

लैपटॉप् इति क्रोड-सङ्गणकयन्त्रं प्रदत्तम् अस्ति, ये हस्ताः पूर्वं पाषाण-खण्डान् स्वीकुर्वन्ति स्म।एतत् परिवर्तनं भाजपा-दलेन समानीतम् अस्ति ।

जम्मू-कश्मीर: शाह-पायलट:

जम्मू-कश्मीरे लोकसभा-निर्वाचनात् पूर्वं, वरिष्ठ-भाजपा-नेता केंद्रीय-मन्त्री च अमित-शाहः , वरिष्ठ-कांग्रेस्-नेता सचिन-पायलटः च अद्य जम्म्वाः कठुआक्षेत्रे जन-सभाः संबोधितवन्तौ । ध्यानास्पदम् अस्ति यत् अस्मिन् लोकसभा-निर्वाचन-क्षेत्रे अप्रैल-एकोनविंश्यां मतदानं भविष्यति।एवमेव जम्म्वामपि मुख्य-स्पर्धा भाजपा-दलस्य प्रत्याशिनः जुगल-किशोरस्य कांग्रेस-प्रत्याशिनः च रमन-भल्ला इत्यस्य मध्ये वर्तते । इदं निर्वाचन-क्षेत्रं चतुर्षु जनपदेषु परिव्याप्तम् अस्ति । अत्र हि अप्रैल-षड्विंश्यां द्वितीय-चरणस्य निर्वाचनं भविष्यति ।

ऋतु-विज्ञानविभागः

भारतीय-ऋतु-विज्ञान-विभागेन अस्य मासस्य एकविंशति-दिनाङ्कं यावत् पूर्वोत्तर-भारते निम्नतः मध्यमवृष्टेः ,झाञ्झावातस्य, अशनि-पातस्य च भविष्यवाणी कृता अस्ति । ऋतु-विज्ञान-विभागेन प्रोदीरितं यत् , आगामिषु षट्-दिवसेषु अरुणाचल,असम,मेघालय-राज्याणां केषुचित् क्षेत्रेषु एतादृशी एव स्थितिः भविष्यति । उत्तर-भारते अस्य मासस्य अष्टादशीतः एकविंशीं यावत् जम्मू-कश्मीर-लद्दाख-हिमाचल-उत्तराखण्डानां केषुचित् भूभागेषु गर्जना-तर्जना-सहितं प्रतिहोरं चत्वारिंशत्-किलोमीटर-मितेन वेगयुतेन झञ्झावातेन सह वृष्टिः हिमपातश्च भविष्यति एति सम्भाव्यते । ऋतुविज्ञानविभागेन प्रोक्तं यत् आगामि-दिनद्वयं यावत् हरियाणा-दिल्ली -उत्तर-प्रदेशेषु तीव्रवेगयुताः धूलि-कणमिश्रिताः लघु-झञ्झावाताः प्रचलिष्यन्ति । अपि च अत्रान्तरे उत्तरभारते मध्यभारते च अधिकतम-तापमानमपि किञ्चित् वर्धिष्यते इति आशास्यते ।

यूपीएससी-परिणाम:

संघ-लोक-सेवा-आयोगेन गत-वर्षस्य नागरिक-सेवा-परीक्षायाः अंतिमः परिणामः घोषितः अस्ति। आदित्य-श्रीवास्तवेन परीक्षायां शीर्षस्थानम् अधिगतम् अस्ति । अनिमेष-प्रधानेन द्वितीयं, डोनुरु-अनन्या-रेड्डी इत्यनया च तृतीय-स्थानं अधिगतम् । आयोग-द्वारा नियुक्ति-कृते आहत्य षोडशोत्तर-एकसहस्र-अभ्यर्थिनः अनुशंसिताः सन्ति ।

।। इति वार्ता: ।।